ग्रन्थिपर्णस्यैव भेदो, भटेउ ऊर इति नेपालदेशे भवति । निशाचरो धनहरः कितवो गणहासकः । रोचको मधुरस्तिक्तः कटुः पाके कटुर्लघुः । तीक्ष्णो हृद्यो हिमो हन्ति कुष्ठकण्डूकफानिलान् । रक्षोऽश्रीस्वेदमेदोऽसृग्ज्वरगन्धविषव्रणान्" भावप्र० ।

**स्थौल्य** न० स्थूलस्य भावः ष्यञ् । पीवरत्वे ।

**स्नपन** पु० स्ना-णिच्-पुक् ल्युट् । जलादिनाऽभिषेककरणे

**स्नव** पु० स्नु-भावे अप् । १स्रवणे २क्षरणे च अमरः ।

**स्नसा** स्त्री स्नस-निरासे अच् । स्नायौ हेमच० ।

**स्नातक** पु० स्ना-भावे क्त स्नातं वेदाध्ययनानन्तरं समावर्त्तनाङ्गस्नानं तदस्यास्ति कन्, कर्त्तरि क्त स्वार्थे क वा । वेदाध्ययनानन्तरं गार्हस्थ्याय कृतसमावर्त्तनाङ्गस्नाने गृहस्थभेदे तस्य व्रतं मिता० आचाराध्याये दर्शितं यथा "स्नानादारभ्य ब्राह्मणस्यावश्यं कर्त्तव्यानि विधिप्रतिनिषेधकात्मकानि मानससंकल्परूपाणि स्नातकव्रतान्याह "न स्वाध्यायविरोध्यर्थमीहेत न यतस्ततः । न विरुद्धप्रसङ्गेन सन्तोषी च भवेत् सदा" याज्ञ० । ब्राह्मणस्य प्रतिग्रहादयोऽर्थप्राप्त्युपाया दर्शिताः । अत्र विशेष उच्यते । स्वाध्यायविरुद्धमर्थमप्रतिषिद्धमपि नेहेत नान्विच्छेत् । न यतस्ततो न यतः कुतश्चिदविदिताचारात्, न विरुद्धप्रसङ्गेन विरुद्धोऽयाज्ययाजनादिप्रसङ्गो नृत्यगीतादि विरुद्धं वा तत्र प्रसङ्गश्च विरुद्धप्रसङ्गः तेन नार्थमीहेत इति सम्बध्यते । तत्र आवृत्तिः प्रत्येकं पर्युदासार्था । सर्वत्रास्मिन् स्नातकप्रकरणे नञ्शब्दः पर्युदासार्थ एव । किञ्च । "अर्थलाभेऽपि सन्तोषी परितृप्तो भवेत् । चकारात् संयतश्च "सन्तोषं परमास्थाय सुखार्थी संयतो भवेत्" इति मनुस्मरणात् । कुतस्तर्हि धनमन्विच्छेदित्यत आह" मिता० "राजान्तेवासियाज्येभ्यः सीदन्निच्छेद्धनं क्षुधा । दम्भिहैतुकपाषण्डिबकवृत्तींश्च वर्जयेत्" याज्ञ० । "क्षुधा सीदन् पीड्यमानः स्नातको राज्ञो विदितवृत्तान्तादन्तेवासिनो वक्ष्यमाणलक्षणाद्याज्याद्याजनार्हाच्च धनमाददीत । क्षुधा सीदन्नित्यनेन विभागादिप्राप्तकुटुम्बपोषणपर्य्याप्तधनो न कश्चिदर्थमन्विच्छेदिति गम्यते । किञ्च । दम्भिहैतुकादीन् सकलकार्य्येषु लौकिकशास्त्रीयेषु वर्जयेत् । लोकरञ्जनार्थमेव कर्मानुष्ठायी दम्भी युक्तिबलेन सर्वत्र संशयकारी हैतुकः त्रैविद्यवृद्धापरिगृहीताश्रमिणः पाषण्डिनः । बकवदस्य वर्त्तनमिति बकवृत्तिः । यथाह मनुः "अधो दृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः । शठो मिथ्याविनीतश्च बकवृत्तिरुदाहृतः" इति । प्रतिषिद्धसेविनो विकर्मस्थाः बिडालमार्जारस्तस्य स्वभावो व्रतं यस्यासौ वैडालव्रतिकः "धर्मध्वजी सदा लुब्धश्छाद्मिको लोकदाम्भिकः । वैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसन्धकः" इति मनुस्मरणात् । चकाराद्विकर्मस्थवैडालव्रतिकशठान् यथाह मनुः "पाषण्डिनो विकर्मस्थान् वैडालव्रतिकान् शठान् । हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्" इति । शठः सर्वत्र वक्रः । एतैः संसर्गनिषेधादेव स्वयं एवंविधो न भवेदिति गम्यते" मिता० । किञ्च "शुक्लाम्बरधरो नीचकेशश्मश्रुनखः शुचिः । न भार्य्यादर्शनेऽश्नीयान्नैकवासा न संस्थितः" याज्ञ० "शुक्ले धौते अम्बरे वाससी धारयतीति शुक्लाम्बरधरः । केशाश्च श्मश्रूणि च नखाश्च केशश्मश्रुनखन्नीचं कृत्तं केशश्मश्रुनखं यस्यासौ तथोक्तः शुचिरन्तर्बहिश्च स्नानानुलेपधूपस्रगादिभिः सुगन्धिश्च भवेत् । यथाह गौतमः "स्नातको नित्यं शुचिः सुगन्धिः स्नानशीलः" इति । सुगन्धवत्त्वविधानादेव निर्गन्धमाल्यस्य निषेधः । तथा च गोभिलः "नागन्धां स्रजं धारयेदन्यत्र हिरण्यरत्नस्रजः" इति । "सदा स्नातक एवम्भूतो भवेत्" एतच्च सति सम्भवे "न जीर्णमलवद्वासा भवेच्च विभवे सतीति" मनुस्मरणात् । न च भार्याया दर्शने तस्यां पुरतोऽवस्थितायां नाश्नीयादवीर्यवदपत्योत्पत्तिभयात् तथा च श्रुतिः "जायाया अन्ते नाश्नीयादवीर्य्यवदपत्यं भवति" इत्यतस्तया सह भोजनं दूरादेव निरस्तम् । न चैकवासाः । नापि संस्थितः उत्थितः अश्नीयादिति संबध्यते मिता० । "न संशयं प्रपद्येत नाकस्मादप्रियं वदेत् । नाहितं नानृतञ्चैव न स्तेनः स्यान्न वार्द्धुषी" याज्ञ० । "कदाचिदपि संशयं प्राणविपत्तिसंशयावहं कर्म न प्रपद्येत न कुर्य्यात् । यथा व्याघ्रचौराद्युपहतदेशाक्रमणादि । अकस्मान्निःकारणं किञ्चिदपि परुषमप्रियम् उद्वेगकारि वाक्यं न वदेत् । न चाहितमनृतं वा प्रियमपि । चकारादसभ्यं बीभत्सकरश्लोकमालां न वदेदिति संबध्यते । एतच्च परिहासादिव्यतिरेकेण "गुरुणापि समं हास्यं कर्त्तव्यं कुटिलं विना" इति स्मरणात् । न च स्तेनः अन्यदीयस्यादत्तस्य ग्रहीता स्यात् न वार्द्धुषी स्यात् प्रतिषिद्धवृद्ध्युपजीवी वार्द्धुषी न स्यात्" मिता० । "दाक्षायणी ब्रह्मसूत्री वेणुमान् सकमण्डलुः । कुर्य्यात् प्रदक्षिणं देवमृद्गोविप्रवनस्पतीन्" याज्ञ० । दाक्षायणं सुवर्णं तदस्यास्तीति दाक्षायणी । ब्रह्मसूत्रं यज्ञोपवीतं यज्ञा-